॥ श्रीवरदराजाचार्यविरचिता ॥

लघुसिद्धान्तकौमुदी

तिङन्ते

स्वादयः तुदादयश्च

लघुकौमुदी के ३५ संस्करणों पर आधारित रंगीन संस्करण

इस विषय के शोधपूर्ण सरलव्याख्यान पद्धति पर आधारित वीडियो हमारे चैनल पर उपलब्ध हैं।

संस्कृतसारः

छिद्यन्ते सर्वसंशयाः

परामर्शकौ

प्रो. ब्रजभूषणओझा

प्रो. नीलाभतिवारी

इन स्लाइड्स के माध्यम से पढ़ने के लिए अथवा इनकी व्याख्या देखने के लिए हमारे चैनल का अनुसरण करें।

YouTube संस्कृतसारः @sanskrit sar

प्रस्तोता

डॉ. श्रीओमशर्मा (व्याकरणविद्याशाखा)

केन्द्रीयसंस्कृतविश्वविद्यालयः,

श्रीरघुनाथकीर्तिपरिसरः देवप्रयागः (उत्तराखण्डः)

निवेदनम्

यह पठन-पाठनसामग्री ‘संस्कृतव्याकरण’ में शीघ्र प्रवेशेच्छुक-छात्राध्यापकों के हेतु ‘संस्कृतसारः’ इस समाजसेवी संस्था द्वारा संस्कृतभाषा की सेवार्थ प्रस्तुत की जा रही है। अतः आपसे निवेदन है कि इन ‘लघुसिद्धान्तकौमुदी’ स्लाइड्स् व वीडियोज् का अपने पठन-पाठन में पर्याप्त उपयोग कर संस्कृत की सेवा में हमारा सहयोग करें। इन स्लाइड्स् को शुद्धतम बनाने का प्रयास करने पर भी ऐसा सम्भव है कि इसमें कहीं त्रुटि रह गयी हों अतः उनके सुधार के लिए हमें ईमेल द्वारा सूचित करें।

सूचना— यह अध्ययन सामग्री पूर्णतः निश्शुल्क है तथा इस पर कोई कॉपीराइट भी नहीं हैं। हमारे द्वारा निर्मित इसी प्रकार की अन्य शिक्षण समग्री को हमारे इस अकाउंट https://archive.org/details/@sanskrit_sar से डाउनलोड करें।

दिनाङ्कः-

17.02.2022

अस्माकं सम्पर्कसूत्राणि—
e-mail अणुवाक्— samskritsaarah@gmail.com
YOUTUBE — संस्कृतसारः @sanskrit sar
FACEBOOK— @sanskrit_shiksha संस्कृतशिक्षा

निवेदकः-

संस्कृतशिक्षा-परिवारः

स्वादिगणे धातवः

संस्कृतसारः
छिद्यन्ते सर्वसंशयाः

उभयपदिधातुषु ‘सु’ धातोः प्रक्रिया

लघुसिद्धान्तकौमुद्याम् (तिङन्ते स्वादयः)

सु + लँट्/तिप्
सु श्नु + ति
सु नु + ति
सु नो + ति (सार्वधातुकार्धधातुकयोः)
सुनोति

सु नु + अन्ति
(हुश्नुवोः सार्वधातुके)
सुन्वन्ति

सु नु + वस्
(लोपश्चास्याऽन्यतरस्यां म्वोः)
सुन्वः, सुनुवः

सु सु + अ
सु सौ + अ
सु स् आव् + अ
सुषाव

सु नु + सि (लौँट्)
सु नु + हि
(उतश्चप्रत्ययादसंयोगपूर्वात्)
सुनु

सु नु + आनि
सु नो + आनि
सुनवानि

❑ षुञ् अभिषवे॥ १॥

❖ शपः श्नु-विधायकं विधिसूत्रम्—

सूत्रम्— स्वादिभ्यः श्नुः (३,१.७३)

अर्थः— शपोऽपवादः। सुनोति। सुनुतः। ‘हुश्नुवोरि’ति यण्। सुन्वन्ति। सुन्वः, सुनुवः। सुनुते। सुन्वाते। सुन्वते। सुन्वहे, सुनुवहे। सुषाव, सुषुवे। सोता। सुनु। सुनवानि। सुनवै।

❖ अभिषवः= स्नपनम् (जलादिनाभिषेककरणम्) , पीडनम् (निष्पीडनम्), स्नानम्, सुरासन्धानञ्च (मदिरानिर्माणम्)।

सु नु + ऐ
सु नो + ऐ
सुनवै

संस्कृतसारः
छिद्यन्ते सर्वसंशयाः

उभयपदिधातुषु 'सु-चि' धातोः प्रक्रिया

लघुसिद्धान्तकौमुद्याम्
(तिङन्ते स्वादयः)

सु + यास् त्
(अकृत्सार्वधातुकयोर्दीर्घः)
सूयात्

अ सु+स् + ईत्
अ सु+ इ स् + ईत्
अ सौ+ इ + ईत्
अ सौ+ ईत्
अ स् आव्+ ईत्
असावीत्

अ सु+स् + त
अ सो+ष् + ट
असोष्ट

चि श्नु + ति (लँट्)
चि नु + ति
चि नो + ति
चिनोति

चि श्नु + ते
चि नु + ते
चिनुते

चि चि+ अ
चि चै+ अ
चिचाय

चि कि+ अ
चि कै+ अ
चिकाय

चि चि+ ए
चिच्ये

चि कि+ ए
चिक्ये

अ चि+स् + ईत्
अ चै+ष् + ईत्= अचैषीत्

सुनुयात्। सूयात्॥

❖ सिचः इड्-विधायकं विधिसूत्रम्—

सूत्रम्— स्तु-सु-धूञ्भ्यः परस्मैपदेषु (७,२.७२)

अर्थः— एभ्यस्सिँच इट् स्यात्परस्मैपदेषु।

असावीत्, असोष्ट॥

❑ चिञ् चयने॥ २॥ चिनोति, चिनुते॥

❖ कुत्व विधायकं विधिसूत्रम्—

सूत्रम्— विभाषा चेः (७,३.५८)

अर्थः— अभ्यासात्परस्य कुत्वं वा स्यात्सनि लिँटि च।

चिकाय, चिचाय चिक्ये, चिच्ये। अचैषीत्, अचेष्ट॥

अ चि+स् + त
अ चे+ष् + ट= अचेष्ट

संस्कृतसारः
छिद्यन्ते सर्वसंशयाः

उभयपदिधातुषु ‘षुञ् अभिषवे’ धातोः रूपाणि

लघुसिद्धान्तकौमुद्याम्
(तिङन्ते स्वादयः)

लँट्—परस्मै. सुनोति सुनुतः सुन्वन्ति। सुनोषि सुनुथः सुनुथ। सुनोमि, सुन्वः सुनुवः, सुन्मः सुनुमः।

लँट्—आत्मने. सुनुते सुन्वाते सुन्वते । सुनुषे सुन्वाथे सुनुध्वे। सुन्वे, सुन्वहे सुनुवहे, सुन्महे सुनुमहे।

लिँट्—परस्मै. सुषाव सुषुवतुः सुषुवुः। सुषविथ सुषोथ, सुषुवथुः सुषुव। सुषाव सुषव, सुषुविव सुषुविम।

लिँट्—आत्मने. सुषुवे सुषुवाते सुषुविरे। सुषुविषे सुषुवाथे, सुषुविढ्वे सुषुविध्वे। सुषुवे सुषुविवहे सुषुविमहे।

लुँट्— परस्मै. सोता सोतारौ सोतारः। सोतासि सोतास्थः सोतास्थ। सोतास्मि सोतास्वः सोतास्मः।

लुँट्— आत्मने. सोता सोतारौ सोतारः। सोतासे सोतासाथे सोताध्वे। सोताहे सोतास्वहे सोतास्महे।

लृँट्— परस्मै. सोष्यति सोष्यतः सोष्यन्ति। सोष्यसि सोष्यथः सोष्यथ। सोष्यामि सोष्यावः सोष्यामः।

लृँट्— आत्मने. सोष्यते सोष्येते सोष्यन्ते। सोष्यसे सोष्येथे सोष्यध्वे। सोष्ये सोष्यावहे सोष्यामहे।

लोँट्— परस्मै. सुनोतु सुनुतात्, सुनुताम् सुन्वन्तु। सुनु सुनुतात्, सुनुतम् सुनुत। सुनवानि सुनवाव सुनवाम।

लोँट्— आत्मने. सुनुताम् सुन्वाताम् सुन्वताम् । सुनुष्व सुन्वाथाम्, सुनुध्वम्। सुनवै सुनवावहै सुनवामहै।

लँङ्— परस्मै.असुनोत् असुनुताम् असुन्वन्। असुनोः असुनुतम् असुनुत। असुनवम् असुन्व असुनुव, असुन्म असुनुम।

लँङ्— आत्मने. असुनुत असुन्वाताम् असुन्वत। असुनुथाः असुन्वाथाम् असुनुध्वम्। असुन्वि, असुन्वहि असुनुवहि असुन्वि असुनुमहि।

संस्कृतसारः
छिद्यन्ते सर्वसंशयाः

उभयपदिधातुषु 'स्तृ' धातोः प्रक्रिया

लघुसिद्धान्तकौमुद्याम्
(तिङन्ते स्वादयः)

स्तृ नु + ति
स्तृ णो + ति
स्तृणोति

स्तृ + यास् त्
(गुणोर्तिसंयोगाद्योः)
स्तर्यात्

अभ्यासस्य
शर्-पूर्वाः खयः
श् ष् स्
क् ख्
च् छ्
ट् ठ्
त् थ्
प् फ्
शिष्यन्ते

स्तृ स्तृ + अ
शर् खय्
स्तर् स्तृ + अ
त स्तृ + अ
(ऋतश्चसंयोगादेर्गुणः)
त स्त् अर् + अ
त स्त् आर् + अ (उपधावृद्धिः)
तस्तार

स्तृ + सीय् स् त
स्तृ + इ सीय् स् त
स्त् अर् + इ षी ष्ट
स्तरिषीष्ट
स्तृ + सीय् स् त
स्तृषीष्ट (उश्च)

अ स्तृ +स् + त
अ स्तृ + इ स् + त
अस्त् अर् + इ ष् + ट
अस्तरिष्ट,
अस्तृत

❑ स्तृञ् आच्छादने॥ ३॥ स्तृणोति, स्तृणुते॥

❖ खयां शिष्टार्थं विधिसूत्रम्—

सूत्रम्— शर्पूर्वाः खयः (७,४.६१)

अर्थः— अभ्यासस्य (आदि) शर्पूर्वाः खयः शिष्यन्तेऽन्ये हलो लुप्यन्ते। तस्तार। तस्तरतुः। तस्तरे। 'गुणोऽर्ती'ति गुणः— स्तर्यात्॥

❖ इटो विकल्पाय विधिसूत्रम्—

सूत्रम्— ऋतश्च संयोगादेः (७,२.४३)

अर्थः— ऋदन्तात्संयोगादेः परयोः लिँङ्सिँचोरिड्वा स्यात्तङि। स्तरिषीष्ट, स्तृषीष्ट। अस्तरिष्ट, अस्तृत॥

संस्कृतसारः
छिद्यन्ते सर्वसंशयाः

उभयपदिधातुषु 'धू/धु' धातोः प्रक्रिया

लघुसिद्धान्तकौमुद्याम्
(तिङन्ते स्वादयः)

धू नु + ति
धू नो + ति
धूनोति

धू धू + अ (लिँट्)
दु धौ + अ
दुधाव

दु धू + इव
दु धुव् + इव
दुधुविव

अ धू इ स्+ ईत्
अ धू इ + ईत्
अ धौ ई त्
अ ध् आव् ई त्
अधावीत्

दु धू + इथ
दु धो + इथ
दुधविथ,
दुधोथ

स्तु-सु-धूञ्भ्यः परस्मैपदेषु — एभ्यस्सिँच इट् स्यात्परस्मैपदेषु।

❑ धूञ् कम्पने= कँपाना (णिजन्तः)॥ ४॥ धूनोति, धूनुते। दुधाव। स्वरतीति वेट्। दुधविथ, दुधोथ॥

❖ इण्निषेधकं सूत्रम्—

सूत्रम्— श्र्युकः किति (७,२.११)

अर्थः— श्रिञ एकाच उगन्ताच्च गित्कितोरिण् न।

(अष्टाध्यायीपाठापेक्षया) परमपि स्वरत्यादि = स्वरतिसूतिसूयतिधूञूदितो वा (७.२.४४) विकल्पं बाधित्वा (विधिप्रकरणात्) पुरस्तात्= पूर्वं प्रतिषेध-काण्डारम्भ-सामर्थ्याद्= निषेधप्रकरणस्य पाठारम्भप्रयासात् अनेन= 'श्र्युकः किति' इत्यनेन निषेधे प्राप्ते क्रादिनियमान्नित्यमिट्। दुधुविव। दुधुवे। अधावीत्, अधविष्ट, अधोष्ट। अधविष्यत्, अधोष्यत्। अधविष्यताम्, अधोष्यताम्। अधविष्यत, अधोष्यत॥

॥ इति स्वादयः॥ ५॥

स्वादिगणस्य परीक्षणम्

०१. लघुसिद्धान्तकौमुद्यां स्वादिगणे कति धातवः स्वरितेत् ?

क. त्रयः

ख. पञ्च

ग. चत्वारः

घ. न कोऽपि

०२. 'श्नु'प्रत्ययस्य विषये इदं कथनमसङ्गतम् —

क. अयं ङिद्वत्।

ख. अयं सार्वधातुकः।

ग. स्वादिगणे एव भवति।

घ. अयं पिद्भिन्नः।

०३. 'सुनोति' इत्यत्र धातोर्गुणादेशः कथं न —

क. तिपः पित्वात्।

ख. श्नुप्रत्ययापित्वात्।

ग. श्नुप्रत्ययस्य पित्वात्।

घ. धातोः सार्वधातुकत्वात्।

०४. 'सुनु+ अन्ति' अत्र यणादेशः केन—

क. स्वादिभ्यः श्नुः

ख. इको यणचि

ग. एरनेकाचोऽसंयोगपूर्वस्य

घ. हुश्नुवोः सार्वधातुके

०५.मकार-वकारयोः परयोः केन सूत्रेणोकारस्य वा लोपः?

क. उतश्चप्रत्ययादसंयोगपूर्वात्

ख. गमहनजनखनघसां लोपः क्ङित्यनँङि

ग. लोपश्चास्यान्यतरस्यां म्वोः

घ. शर्पूर्वाः खयः

०६. 'सुनवै' इति रूपं वर्त्तते—

क. लृँट्लकारस्य

ख. लोँट्लकारस्य

ग. लृँङ्लकारस्य

घ. विधिलिँङ्लकारस्य

०७. चिञ्-धातोः कुत्वं कुत्र—

क. लुँङि

ख. लिँटि

ग. लँटि

घ. लृँटि

०८. अभ्यासस्य शर्पूर्वाः..........शिष्यन्तेऽन्ये हलो लुप्यन्ते।

क. कपः

ख. हलः

ग. खयः

घ. शरः

०९. एतेषु कुत्र गुणो नास्ति—

क. तस्तरतुः

ख. स्तर्यात्

ग. तस्तरे

घ. तस्तार

१०. 'अस्तरिष्ट, अस्तृत' इत्यत्र वैकल्पिक-इडागमः केन सूत्रेण—

क. श्र्युकः किति

ख. स्तुसुधूञ्भ्यः परस्मैपदेषु

ग. ऋतश्च संयोगादेर्गुणः

घ. ऋतश्च संयोगादेः

११. 'श्र्युकः किति' इति सूत्रेण भवति—

क. श्रिञ्-धातोः उगन्ताच्च धातोः परे एकाच गित्-कित्प्रत्ययेषु परेषु इट् न भवति।

ख. श्रिञ्-धातोः एकाच उगन्ताच्च धातोः परे गित्-कित्प्रत्ययेषु परेषु इट् न भवति।

ग. श्रिञ्-धातोः एकाच उगन्ताच्च धातोः परे ङित्-कित्प्रत्ययेषु परेषु इट् न भवति।

घ. श्रिञ्-धातोः एकाच उगन्ताच्च धातोः परे गित्-कित्प्रत्ययस्य इट् न भवति।

१२. परमपि 'स्वरतिसूतिसूयतिधूञूदितो वा' इति सूत्रं बाधित्वा कथं 'श्र्युकः किति' इति सूत्रस्य निषेधः प्रवर्त्तते ?

क. नित्यत्वात्

ख. परस्तात्प्रतिषेधकाण्डारम्भसामर्थ्यात्

ग. पुरस्तात्प्रतिषेधकाण्डारम्भसामर्थ्यात्

घ. क्रादिनियमात्

१३. 'दुधुविव' इत्यस्य विषये इदं कथनमसङ्गतम्—

क. 'श्र्युकः किति' इति निषेधं बाधित्वा अत्र क्रादिनियमान्नित्यमिट्।

ख. ‘धू’धातोर्लिँट्युत्तमपुरुषस्य द्विवचनस्येदं रूपम्।

ग. अत्र उवङादेशो भवति।

घ. अत्र गुणादेशो भवति।

१४. ‘अभिषव’ इत्यस्यायमर्थो नास्ति—

क. स्नानम्

ख. मदिरानिर्माणम्

ग. शयनम्

घ. निष्पीडनम्

१५. ‘स्नपनम्’ इत्यस्यार्थोऽस्ति—

क. जलादिनाभिषेकः

ख. दुग्धपानम्

ग. प्रच्छालनम्

घ. नीराजनम्

१६. ‘सुनु’ इति रूपं वर्त्तते—

क. लिँटि

ख. लोँटि

ग. विधिलिँङि

घ. आशीर्लिँङि

१७. ‘पुरस्तात्प्रतिषेधकाण्डारम्भसामर्थ्यादनेन निषेधे प्राप्ते’ इत्यत्र ‘अनेन’ इति पदेन कस्य ग्रहणम् ?

क. विप्रतिषेधे परं कार्यम् इति सूत्रस्य

ख. श्र्युकः किति इति सूत्रस्य

ग. स्वरतिसूतिसूयतिधूञूदितो वा इति सूत्रस्य

घ. प्रतिषेधकाण्डस्य

१८. धूञ्धातुविषयेऽसङ्गतं कथनं चिनुत—

क. अयं ह्रस्व-उकारान्तोऽप्यस्ति।

ख. अयं धातुः सेट् सन्नपि वेट्।

ग. लिँट्युत्तमे द्विवचनबहुवचनयोर्नित्यमिट्।

घ. लिँट्युत्तमे द्विवचनबहुवचनयो एव नित्यमिट्।

१९. एतेषु कुत्र ‘लोपश्चाऽस्यान्यतरस्यां म्वोः’ इति सूत्रं न प्रवर्त्तते—

क. षुञ् अभिषवे

ख. शक्लृँ शक्तौ

ग. धूञ् कम्पने

घ. चिञ् चयने

२०.एतेषु कुत्र ‘उतश्चप्रत्ययादसंयोगपूर्वात्’ इति सूत्रं न प्रवर्त्तते—

क. आप्लृँ व्याप्तौ

ख. षुञ् अभिषवे

ग. धूञ् कम्पने

घ. चिञ् चयने

२१. ‘अस्तृत’ इत्यत्र कस्य लोपः—

क. तिप इकारस्य

ख. धातोः नकारस्य

ग. सिचः सकारस्य

घ. प्रत्ययस्य पकारस्य

२२. ‘असुनुवम्’ इति रूपं वर्त्तते—

क. लुँङि

ख. लँङि

ग. लृँङि

घ. न कुत्रापि

२३. अशुद्धं रूपं चिनुत—

क. अचेषत

ख. चिनुवै

ग. चिनु

घ. अचेष्येताम्

२४. ‘स्तृण्वते’ इत्यत्र अत्-आदेशविधायकं किम्।

क. आत्मनेपदेष्वनतः

ख. अदभ्यस्तात्

ग. सिजभ्यस्तविदिभ्यश्च

घ. झोऽन्तः

२५. ‘स्तरिष्यसे’ इत्यत्र इडागमः केन—

क. आर्धधातुकस्येड् वलादेः

ख. क्रादिनियमेन नित्यमिट्

ग. ऋद्धनोः स्ये

घ. स्वरतिसूतिसूयतिधूञूदितो वा

संस्कृतसारः
छिद्यन्ते सर्वसंशयाः

तुदादिगणे धातवः

लघुसिद्धान्तकौमुद्याम् (तिङन्ते तुदादयः)

अथोभयपदिनः

1. तुदँ व्यथने
2. णुदँ प्रेरणे
3. भ्रस्जँ पाके
4. कृषँ विलेखने
5. मिलँ संगमे
6. मुचॢँ मोचने
7. लुपॢँ छेदने
8. विदॢँ लाभे
9. षिचँ क्षरणे
10. लिपँ उपदेहे

अथ परस्मैपदिनः

1. कृतीँ छेदने
2. खिदँ परिघाते
3. पिशँ अवयवे
4. ओँव्रश्चूँ छेदने
5. व्यचँ व्याजीकरणे
6. उछिँ उञ्छे
7. ऋच्छँ गतीन्द्रियप्रलय-मूर्तिभावेषु
8. उज्झँ उत्सर्गे
9. लुभँ विमोहने

10. 11. तृपँ तृम्फँ तृप्तौ

12. 13. मृडँ पृडँ सुखने

14. शुनँ गतौ
15. इषुँ इच्छायाम्
16. कुटँ कौटिल्ये
17. पुटँ संश्लेषणे
18. स्फुटँ विकसने

19. 20. स्फुरँ स्फुलँ संचलने

21. णू स्तवने
22. टुमस्जोँ शुद्धौ
23. रुजोँ भङ्गे
24. भुजोँ कौटिल्ये
25. विशँ प्रवेशने
26. मृशँ आमर्शने
27. षदॢँ विशरणगत्यवसादनेषु
28. शदॢँ शातने
29. कॄ विक्षेपे
30. गॄ निगरणे
31. प्रच्छँ ज्ञीप्सायाम्

अथात्मनेपदिनः

1. मृङ् प्राणत्यागे
2. पृङ् व्यायामे
3. जुषीँ प्रीतिसेवनयोः
4. ओँविजीँ भयचलनयोः

संस्कृतसारः
छिद्यन्ते सर्वसंशयाः

उभयपदिधातुषु 'तुद्' धातोः प्रक्रिया

लघुसिद्धान्तकौमुद्याम्
(तिङन्ते तुदादयः)

तुद्+ लँट्/तिप्
तुद् श + ति
तुद् अ + ति
तुदति

तुद् तुद् + अ
तु तुद् + अ
तु तोद् + अ
तुतोद

❑ तुदँ व्यथने॥ १॥

❖ श-विधायकं विधिसूत्रम्—

सूत्रम्— तुदादिभ्यः शः (३,१.७७)

अर्थः— शपोऽपवादः। तुदति, तुदते। तुतोद। तुतोदिथ। तुतुदे। तोत्ता। अतौत्सीत्, अतुत्त॥

❑ णुदँ प्रेरणे॥ २॥

नुदति, नुदते। नुनोद। नोत्ता।

तुद्+ ता
तोत्+ ता
तोत्ता

अतुद् स्+ ईत्
अतौत् स्+ ईत् (वदव्रज..)
अतौत्सीत्

अतुद् स्+ त
अतुत् + त
अतुत्त (झलो झलि..)

उभयपदिधातुषु 'भ्रस्ज्' धातोः प्रक्रिया (अनिट्)

लँट्

भ्रस्ज्+ तिप्
भृस्ज् श + ति (सम्प्रसारणम्)
भृश् ज् अ + ति (श्चुत्वम्)
भृज् ज् अ + ति (जश्त्वम्)
भृज्जति

लिँट्

भ्रस्ज्+ अ
भ र् ज्+अ (रमागमः)
भर्ज् भर्ज्+ अ
ब भर्ज्+ अ
बभर्ज

ब भर्ज्+ थ
ब भर्ष्+ ठ
बभर्ष्ठ

रमाभावे

भ्रस्ज् भ्रस्ज् + अ
बभ्रश् ज्+ अ (श्चुत्वम्)
बभ्रज् ज्+ अ (जश्त्वम्)
बभ्रज्ज

बभ्रस्ज्+ थ
बभ्रज् + थ
बभ्रष् + ठ
बभ्रष्ठ

लुँट्

भर्ज् + ता
भर्ष् + टा
भर्ष्टा

भ्रस्ज् + ता
भ्रज् + ता
भ्रष् + टा
भ्रष्टा

❑ **भ्रस्जँ पाके** = भर्जने ॥ ३ ॥ 'ग्रहिज्येति सम्प्रसारणम्'। सस्य श्चुत्वेन शः। शस्य जश्त्वेन जः। भृज्जति, भृज्जते ॥

❖ रमागम-विधायकं विधिसूत्रम्—

सूत्रम्— भ्रस्जो रोपधयो रमन्यतरस्याम् (६,४.४७)

अर्थः— भ्रस्जो रेफस्योपधायाश्च स्थाने रमागमो वा स्यादार्धधातुके।

मित्वादन्त्यादचः परः। स्थानषष्ठीनिर्देशाद्रोपधयो-र्निवृत्तिः। बभर्ज। बभर्जतुः। बभर्जिथ, बभर्ष्ठ। बभ्रज्ज। बभ्रज्जतुः। बभ्रज्जिथ। 'स्कोरि'ति सलोपः। व्रश्चेति षः। बभ्रष्ठ। बभर्जे, बभ्रज्जे। भर्ष्टा, भ्रष्टा। भर्क्ष्यति, भ्रक्ष्यति।

भर्ज् स्य + ति
भर्ष् स्य + ति
भर्क् ष्य + ति

भ्रस्ज् स्य + ति
भ्रष् स्य + ति
भ्रक् ष्य + ति

उभयपदिधातुषु ‘भ्रस्ज्’ धातोः प्रक्रिया (अनिट्)

वार्त्तिकम्— क्ङिति रमागमं बाधित्वा सम्प्रसारणं पूर्वविप्रतिषेधेन।

अर्थः— क्ङिति आर्धधातुके परे रमागमं बाधित्वा पूर्वविप्रतिषेधेन सम्प्रसारणं भवति।

भृज्ज्यात्। भृज्ज्यास्ताम्। भृज्ज्यासुः। भर्क्षीष्ट, भ्रक्षीष्ट। अभार्क्षीत्, अभ्राक्षीत्। अभर्ष्ट, अभ्रष्ट॥

आशीर्लिँङ्

भ्रस्ज् + यास् त्
भृ श् ज् + यास्त
भृ ज् ज् + यास्त
भृज्ज्यात्

भर्ज् + सीय् स् त
भर्ष् + सीय् स् त
भर्क् + षी ष् ट
भर्क्षीष्ट

लुँङ्

अभर्ज् स् + ईत्
अभार्ष् स् + ईत्
अभार्क् ष्+ ईत्
अभार्क्षीत्

उभयपदिधातुषु 'कृष्' धातोः प्रक्रिया (अनिट्)

लुँट्

कृष् + ता
कृ अम् ष् + ता
कृ अ ष् + ता
क्रष् + टा
क्रष्टा

अमाभावे

कृष् + ता
कर्ष् + ता
कर्ष् + टा
कर्ष्टा

आशीर्लिँङ्

कृष् + षीष्ट
कृक् + षीष्ट
कृक्षीष्ट

सिचि-अमागमपक्षे

अकृष् च्लिँ + त्
अकृ अ ष् स् + त्
अक्र ष् स् + ईत्
अक्रा क् ष् + ईत्
अक्राक्षीत्

❑ **कृषँ विलेखने= भूमिकर्षणे॥ ४॥ कृषति कृषते। चकर्ष, चकृषे॥**

❖ वैकल्पिक-अमागम-विधायकं विधिसूत्रम्—

सूत्रम्— अनुदात्तस्य चर्दुपधस्यान्यतरस्याम् (६,१.५९)

अर्थः— उपदेशेऽनुदात्तो य ऋदुपधस्तस्याम्वा स्याज्झलादावकिति। क्रष्टा, कर्ष्टा। कृक्षीष्ट।

वार्त्तिकम्— (स्पृश-मृश-कृष-तृप-दृपां च्लेः सिँज्वा वाच्यः)

अर्थः— स्पृश्-मृश्-कृष्-तृप्-दृप् एभ्यः धातुभ्यः परे च्लेः स्थाने सिँज्वा स्यात्।

(सिच्यम्वा) अक्राक्षीत्, अकार्क्षीत्, (पक्षे क्स) अकृक्षत्। (तङि कित्वादम्न) अकृष्ट। अकृक्षाताम्। अकृक्षत। क्सपक्षे अकृक्षत। अकृक्षाताम्। अकृक्षन्त॥ (अयं चेन्नैसंस्करणे न)

❑ **मिलँ संगमे॥ ५॥** मिलति, मिलते, मिमेल। मेलिता। अमेलीत्॥

संस्कृतसारः
छिद्यन्ते सर्वसंशयाः

उभयपदिधातुषु 'मुच्' धातोः प्रक्रिया (अनिट्)

लघुसिद्धान्तकौमुद्याम्
(तिङन्ते तुदादयः)

लँट्

मुच्+ तिप्
मुच् श + ति
मु न् च् अ + ति
मं च् अ + ति (नश्चापदा...)
मुञ् च + ति (अनुस्वारस्य..)
मुञ्चति

लुँट्

मुच् + ता
मोक् + ता
मोक्ता

लुँङ्

अमुच् च्लिँ + त्
अमुच् अ + त् पुषादिद्युतादि..
अमुचत्

अमुच् च्लिँ + त
अमुच् स् + त झलो झलि
अमुक्त

आशीर्लिँङ्

मुच् + षीष्ट
मुक् + षीष्ट
मुक्षीष्ट

❑ मुचॢँ मोचने॥ ६॥

❖ नुमागम-विधायकं विधिसूत्रम्—

सूत्रम्— शे मुचादीनाम्॥ (७,१.५९)

अर्थः— मुच् लिप् विद् लुप् सिच् कृत् खिद् पिशां नुम् स्यात् शे परे। मुञ्चति, मुञ्चते। मोक्ता। मुच्यात्। मुक्षीष्ट। अमुचत्, अमुक्त। अमुक्षाताम्। अमुक्षत।

नुम् स्यात्।

१.मुच्	२.लिप्
३.विद्	४.लुप्
५.सिच्	६.कृत्
७.खिद्	८.पिश्

श-विकरणे परे

संस्कृतसारः

छिद्यन्ते सर्वसंशयाः

उभयपदिधातुषु 'लुप्-विद्' धातोः प्रक्रिया (अनिट्)

लघुसिद्धान्तकौमुद्याम् (तिङन्ते तुदादयः)

लँट्

लुप् + तिप्

लु न् प् अ + ति

लुं प् अ + ति (नश्चापदा...)

लुम् प + ति (अनुस्वारस्य..)

लुम्पति

लुँट्

लुप् + ता

लोप् + ता

लोप्ता

लुँङ्

अलुप् च्लिँ + त

अलुप् स् + त

अलुप्त झलो झलि

- लुपॢँ छेदने॥ ७॥ लुम्पति, लुम्पते। लोप्ता। अलुपत्। अलुप्त।
- विदॢँ लाभे॥ ८॥ विन्दति, विन्दते। विवेद, विवेदे। व्याघ्रभूतिमते सेट्। वेदिता। भाष्यमतेऽनिट्। परिवेत्ता॥

दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते।
परिवेत्ता सविज्ञेयः परिवित्तिस्तु पूर्वजः॥ ३.१७१॥
(मनुस्मृतिः)

संस्कृतसारः
छिद्यन्ते सर्वसंशयाः

उभयपदिधातुषु 'सिच्-लिप्' धातोः प्रक्रिया (अनिट्)

लघुसिद्धान्तकौमुद्याम् (तिङन्ते तुदादयः)

लँट्

सिच्+ तिप्
सिच् श + ति
सि न् च् अ + ति
सिं च् अ + ति (नश्चापदा...)
सिञ् च + ति (अनुस्वारस्य..)
सिञ्चति

लँट्

लिप् अ + ति
लि न् प् अ + ति
लिं प् अ + ति
लिम् प् अ + ति= लिम्पति

लुँङ्

असिच् च्लिँ + त्
असिच् अ + त्
असिचत्

लुँङ्

असिच् च्लिँ + त
असिच् अ + त
असिचत
असिच् स् + त
असिक् + त (चोः कुः)
असिक्त

❑ षिचँ क्षरणे॥ ९॥ सिञ्चति, सिञ्चते॥

❖ अङादेश-विधायकं विधिसूत्रम्—

सूत्रम्— लिपिसिचिह्वश्च (३,१.५३)

अर्थः— एभ्यश्च्लेरङ् स्यात्। असिचत्॥

❖ वैकल्पिक-अङादेश-विधायकं विधिसूत्रम्—

सूत्रम्— आत्मनेपदेष्वन्यतरस्याम् (३,१.५४)

अर्थः— लिपिसिचिह्वः परस्य च्लेरङ् वा तङि। असिचत, असिक्त॥

❑ लिपँ उपदेहे॥ १०॥ उपदेहो वृद्धिः। लिम्पति, लिम्पते। लेप्ता। अलिपत्, अलिपत, अलिप्त॥

॥ इत्युभयपदिनः ॥

परस्मैपदिधातुषु 'कृत्-खिद्-पिश्' धातोः प्रक्रिया

लँट्

कृत्+ तिप्
कृन् त् अ + ति
कृं त् अ + ति (नश्चापदा...)
कृन् त् अ+ ति (अनुस्वारस्य..)
कृन्तति

लिँट्

कृत् कृत् + अ
क कृत् + अ
च कर्त् + अ
चकर्त

लृट्

कृत् स्य + ति
कर्त् इ स्य + ति
कर्तिष्यति

लुङ्

अकृत् च्लिँ + त्
अकृत् स् + त्
अकर्त् इ स् + ईत्
अकर्त् इ + ईत्
अकर्तीत्

- कृतीँ छेदने॥ ११॥ कृन्तति। चकर्त। कर्तिता। कर्तिष्यति, कर्त्स्यति। अकर्तीत्॥
- खिदँ परिघाते॥ १२॥ खिन्दति। चिखेद। खेत्ता॥
- पिशँ अवयवे दीपनायां च॥ १३॥ पिंशति। पेशिता॥ त्वष्टा रूपाणि पिंशतु।

सूत्रम्— सेऽसिचि कृत-चृत-च्छृद-तृद-नृतः
अर्थः— एभ्यः परस्य सिज्भिन्नस्य सादेरार्धधातुकस्येड् वा।

अनुस्वार-वर्गपञ्चम- शकार-टवर्गवर्णानां विषये प्रमुखविचारः

नकारजावनुस्वारपञ्चमौ झलि धातुषु।
सकारजश्शकारश्चेषाट्टवर्गस्तवर्गजः ॥

इत्यभियुक्तोक्तेः। अस्यायमर्थः—धात्ववयवझलि परे कुत्रचिदनुस्वारः कुत्रचित् पञ्चमवर्णौ ङकारादिश्च दृश्येते तौ नकारजौ। अनुस्वारो यथा—स्रंसु, ध्वंसु, भ्रंसु इत्यादौ। पञ्चमोयथा—अङ्क, अञ्च, लुण्ठ, मन्थ, तृम्फ इत्यादौ। चकारे परे यः शकारो दृश्यते 'ओव्रश्चू' इत्यादौ स श्चुत्वनिष्पन्नः सकारजः। रेफषकाराभ्यां परष्टवर्गस्तवर्गजः; यथा—रेफात् परः 'ऊर्णु' इति षकारात्परः टवर्गस्तवर्गजः 'ष्टु' 'ष्टा' इत्यादौ॥



संस्कृतसारः
छिद्यन्ते सर्वसंशयाः

परस्मैपदिधातुषु 'व्रश्च्' धातोः प्रक्रिया (वेट्)

लघुसिद्धान्तकौमुद्याम्
(तिङन्ते तुदादयः)

लँट्

व्रश्च् अ + ति
वृश्च् अ + ति (ग्रहिज्या...)
वृश्चति

लिँट्

व्रश्च् व्रश्च् + अ
वृश्च् व्रश्च् + अ (लिँट्यभ्यासस्ये..)
वर् श्च् व्रश्च् + अ
व व्रश्च् + अ
वव्रश्च

व व्रश्च् + इथ
वव्रश्चिथ
वव्रश्च्+थ (स्कोः संयोग..)
वव्रष्+ थ (व्रश्चभ्रस्ज..)
वव्रष्+ ठ (ष्टुना ष्टुः)
वव्रष्ठ

लुँङ्

अव्रश्च् इ स्+ ई त्
अव्रश्चीत्
अव्रश्च् स्+ ई त्
(हलन्तलक्षणावृद्धिः, संयोगादिलोपः, षत्वं कत्वम्)
अव्रच्>ष्>क् ष्+ ई त्

❑ ओँव्रश्चूँ छेदने॥ १४॥ 'ग्रहिज्या..' वृश्चति। ('लिँट्यभ्यासस्ये..'ति रेफस्य ऋकारः। तस्यात्वे वस्य पुनरुत्वं न, अत्वस्य स्थानिवत्वेन 'न सम्प्रसारणे..' इति निषेधात्)[१] वव्रश्च। वव्रश्चिथ, वव्रष्ठ। व्रश्चिता, व्रष्टा। व्रश्चिष्यति, व्रक्ष्यति। वृश्च्यात्। अव्रश्चीत्, अव्राक्षीत्[२]॥

१.अयं पाठः चेन्नै संस्करणेऽधिकः। २. कतिपयसंस्करणेष्वयं नास्ति।

व्रश्च् + ता
व्रच्>ष् + ता
व्रष्टा

व्रश्च् स्य + ति
व्रष्>क् स्य + ति
व्रक्ष्यति

नञ्भेदयोः प्रसज्य-पर्युदासयोर्विवेकः

द्वौ नञौ तु समाख्यातौ पर्युदासप्रसज्यकौ। पर्युदासः सदृग्ग्राही प्रसज्यस्तु निषेधकृत्॥१॥
प्राधान्यं हि विधेर्यत्र प्रतिषेधेऽप्रधानता। पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ्॥२॥
अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता। प्रसज्यस्तु स विज्ञेयः क्रियया सह यत्र नञ्॥३॥

पर्युदासः

१.विधेः प्राधान्यं भवति। निषेधस्याप्राधान्यम्।
२. यस्य निषेधः क्रियते , तत्सदृशस्यैव ग्रहणं भवति।

➢ यथा— 'अब्राह्मणम् आनय' इति वाक्ये ब्राह्मणभिन्नं किन्तु ब्राह्मणसदृशं कश्चन पुरुष आनीयते। न तु लोष्ठादिकम्।

प्रसज्यः

१.विधेः अप्राधान्यं भवति। निषेधस्य प्राधान्यम्।
२. अत्र सर्वथा निषेध एव भवति। तत्सदृशस्यापि ग्रहणं न करणीयम्।

➢ यथा— 'अनृतं न वक्तव्यम्' इत्यत्र सत्यमिश्रितमपि मिथ्याभाषणं न करणीयम्। अश्वत्थामा हत इतिवत्।

→ -अत्र 'अनसि' इति पर्युदासः, तथा च अस्भिन्ने अस्सदृशे प्रत्यये परे व्यचेः कुटादित्वमित्यर्थः। एवं च 'गाङ् कुटादिभ्यः—' इति सूत्रेण तासादेर्ङिद्वद्भावे 'ग्रहिज्या—' इति सम्प्रसारणे 'विचिता' इत्यादि भविष्यति इति चेन्न; यतः सादृश्यं कृत्त्वेन गृह्यते तथा च अस्भिन्नकृत्प्रत्यये परे एव तत्प्रवृत्तिरिति भावः॥

❑ व्यचँ व्याजीकरणे॥ १५॥ विचति। विव्याच। विविचतुः। व्यचिता। व्यचिष्यति। विच्यात्। अव्याचीत्, अव्यचीत्। वार्त्तिकम्—
'व्यचेः कुटादित्वमनसी'ति तु नेह प्रवर्तते, अनसीति पर्युदासेन कृन्मात्रविषयत्वात्॥

लँट्

व्यच् अ + ति
विच् अ + ति (ग्रहिज्या...)
विचति

लिँट्

व्यच् व्यच् + अ
विच् व्यच् + अ
वि व्याच् + अ
विव्याच

लिँट्

व्यच् + अतुस्
विच् + अतुस्
विच् विच् + अतुस्
विविचतुः

अव्यच् च्लिँ + त्
अव्यच् स् + त्
अव्यच् इ स् + ईत्
अव्याच् इ + ईत्
अव्याचीत्, अव्यचीत्

परस्मैपदिधातुषु ‘उञ्छ्-ऋच्छ्-उज्झ्-लुभ्’ धातूनां प्रक्रिया

लँट्

उछ् अ + ति
उन् छ् अ + ति (इदितो नुम् धातोः
उञ् छ् अ + ति
उञ्छति

लिँट्

ऋच्छ् ऋच्छ्+ अ
अर् च्छ् ऋच्छ् + अ
अ ऋच्छ् + अ
आ ऋच्छ् + अ (अत आदेः)
आ अर्च्छ् + अ (ऋच्छत्यृताम्)
आन् अर्च्छ् + अ (तस्मान्नुड..)
आनर्च्छ

❑ उछिँ उञ्छे॥ १६॥ उञ्छति। उञ्छः कणश आदानं कणिशाद्यर्जनं= शस्यमञ्जर्याः ग्रहणम् शिलम्। इति यादवः= श्रीयादवाचार्यप्रणीतः वैजयन्तीकोषः॥

❑ ऋच्छँ गति-इन्द्रियप्रलय=शयनम् मूर्तिभावेषु= काठिन्यम्॥ १७॥ ऋच्छति। ‘ऋच्छत्यृतामि’ति गुणः। द्विहल्-ग्रहणस्य अनेकहलुपलक्षणत्वान्नुँट्। आनर्च्छ। आनर्च्छतुः। ऋच्छिता॥

❑ उज्झँ उत्सर्गे॥ १८॥ उज्झति॥ ❑ लुभँ विमोहने॥ १९॥ लुभति॥

❖ वैकल्पिक-इट्-विधायकं विधिसूत्रम्—

सूत्रम्— तीष-सह-लुभ-रुष-रिषः (७,२.४८) (ति+ इष= तीष)

अर्थः— इच्छत्यादेः परस्य तादेरार्धधातुकस्येड्वा स्यात्। लोभिता, लोब्धा। लोभिष्यति॥

परस्मैपदिधातुषु 'तृप्-तृम्फ्-मृड्-पृड्- शुन्-इष्' धातूनां प्रक्रिया

लँट्

तृम्फ् अ + ति
तृफ् अ + ति (नकारलोपः)
तृन् फ् अ + ति
तृं फ् अ + ति
तृम्फति

लँट्

इष् अ + ति
इछ् अ + ति (इषु-गमि..)
इ त् छ् अ + ति
इ च् छ् अ + ति
इच्छति।

- तृपँ तृम्फँ तृप्तौ॥ २०-२१॥ तृपति। ततर्प। तर्पिता। अतर्पीत्। सिँञ्चिकल्पस्तु न; तस्य अङ्पवादत्वेन तृप्यतेरेव ग्रहणात्। शस्य ङित्वान्नलोपे—

अयं चेन्नै संस्करणेऽधिकः पाठः।

वार्त्तिकम्— शे तृम्फादीनां 'नुम्' वाच्यः।

अर्थः— आदिशब्दः प्रकारे= सादृश्ये, तेन येऽत्र= तुदादिगणे नकार-अनुषक्ताः=युक्ताः (नकारोपधः) ते तृम्फादयः (तेषां 'नुम्' स्यात्)। तृम्फति। ततृम्फ। तृफ्यात्॥

- मृडँ पृडँ सुखने॥ २२-२३॥ मृडति। पृडति।
- शुनँ गतौ॥ २४॥ शुनति॥
- इषुँ इच्छायाम्॥ २५॥ इच्छति। एषिता, एष्टा। एषिष्यति। इष्यात्। ऐषीत्॥

आदिशब्दं तु मेधावी चतुर्ष्वर्थेषु भाषते।
सामीप्ये[१] च व्यवस्थायां[२] प्रकारे[३]ऽवयवे[४] तथा॥

परस्मैपदिधातुषु कुटादिषु ‘कुट्-पुट्-स्फुट्-स्फुर्-स्फुल्-नू’ धातूनां प्रक्रिया

लिँट्

कुट् कुट् + इथ
चु कुट् + इथ (गाङ्कुटादिभ्य..)
चुकुटिथ

नू अ+ ति
नुव् अ+ ति
नुवति

लँट्

निर् + स्फुरति
निः + ष्फुरति= २.निःष्फुरति (वा शरि)
नि + ष्फुरति= १.निष्फुरति (विसर्गलोपे)
(वा शरि इति विकल्पपक्षे) ३.निष्ष्फुरति

वार्तिकम्—खर्परे शरि वा विसर्गस्य लोपो वा वक्तव्यः।

- ❑ कुटँ कौटिल्ये॥ २६॥ ‘गाङ्कुटादी’ति ङित्त्वम्॥
  चुकुटिथ। चुकोट, चुकुट। कुटिता॥
- ❑ पुटँ संश्लेषणे॥ २७॥ पुटति। पुटिता।
- ❑ स्फुटँ विकसने॥ २८॥ स्फुटति। स्फुटिता॥
- ❑ स्फुरँ स्फुलँ सञ्चलने॥ २९-३०॥ स्फुरति। स्फुलति॥

❖ वैकल्पिक-षत्व-विधायकं विधिसूत्रम्—

सूत्रम्— स्फुरति-स्फुलत्योर्निर्निविभ्यः (८,३.७६)

अर्थः— स्फुरति-स्फुलत्योः सकारस्य ‘निस्-नि-वि’ इत्येतेभ्य उत्तरस्य षत्वं वा स्यात्। निःष्फुरति, निःस्फुरति।

- ❑ णू स्तवने॥ ३१॥ परिणूतगुणोदयः। नुवति। नुनाव। नुविता॥

संस्कृतसारः
छिद्यन्ते सर्वसंशयाः

परस्मैपदिधातुषु 'मस्ज्' धातोः प्रक्रिया

लघुसिद्धान्तकौमुद्याम्
(तिङन्ते तुदादयः)

लँट्

मस्ज्+ ति
मश्ज् अ+ ति (श्चुत्वम्)
मज्ज् अ+ ति (जश्त्वम्)
मज्जति

लिँट्

मस्ज् मस्ज् + अ
ममज्ज् + अ (श्चुत्वजश्त्वे)
ममज्ज

लिँट्

मस्ज् + थ
मस् न् ज् + थ
(मस्जिनशोर्झलि)
म मस् न् ज् + थ (स्को..)
मम न् ग् +थ (चो कुः)
मम न् क् +थ (खरि च)
मम ङ् क् +थ (अनुस्वारपरसवर्णौ)
ममङ्क्थ

लुँट्

मस्ज् + ता
मस् न् ज् + ता
म न् ज् + ता
म न् ग् + ता
म न् क् + ता
मं क् + ता
म ङ् क् + ता
मङ्क्ता

❑ टुमस्जोँ शुद्धौ॥ ३२॥ मज्जति। ममज्ज।
ममज्जिथ 'मस्जिनशो...'रिति नुम्।
वार्त्तिकम्— मस्जेरन्त्यात्पूर्वो नुँम्वाच्यः।
अर्थः— 'मस्ज्'धातोरन्त्यवर्णात् पूर्वं नुमागमः स्यात्।
संयोगादिलोपः। ममङ्क्थ। मङ्क्ता। मङ्क्ष्यति।
अमाङ्क्षीत्। अमाङ्क्ताम्। अमाङ्क्षुः॥

नुम्-सलोप-कुत्व-चर्त्व-अनुस्वार-परसवर्ण-षत्वे—
म ङ् क् ष्य + ति= मङ्क्ष्यति

नुम्-सलोप-कुत्व-चर्त्व-अनुस्वार-परसवर्ण-षत्वे—
अमस्ज् स् + ईत्= अमाङ्क्षीत्

संस्कृतसारः छिद्यन्ते सर्वसंशयाः

परस्मैपदिधातुषु 'रुज्-भुज्-विश्-मृश्- सद्-' धातूनां प्रक्रिया

लघुसिद्धान्तकौमुद्याम् (तिङन्ते तुदादयः)

- रुजोँ भङ्गे॥ ३३॥ रुजति। रोक्ता। रोक्ष्यति। अरौक्षीत्॥
- भुजोँ कौटिल्ये॥ ३४॥ रुजिवत्॥
- विशँ प्रवेशने॥ ३५॥ विशति॥
- मृशँ आमर्शने॥ ३६॥ आमर्शनं स्पर्शः॥ अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्॥ अम्राक्षीत्, अमार्क्षीत्, अमृक्षत्॥
- षदॢँ विशरणगत्यवसादनेषु॥ ३७॥ सीदतीत्यादि॥

लुँट्

रुज् + ता
रोग् + ता (चो कुः)
रोक् + ता (खरि च)
रोक्ता

लृँट्

रुज् स्य + ति
रोग् स्य + ति
रोक् ष्य + ति
रोक्ष्यति

अरुज् स् + ईत्
अरौग् स् + ईत्
अरौक् ष् + ईत्
अरौक्षीत्

सद् + ति
सीद् अ + ति
सीदति

सिचि अम् पक्षे

अमृश् च्लिँ + ईत्
अम् अ श् स् + ईत्
अम् र् अ श् स् + ईत्
अम् र् अ ष् स् + ईत्
अम् र् आ क् ष् + ईत्
अम्राक्षीत्

सिचि अमभावे

अमृश् च्लिँ + ईत्
अमृश् स् + ईत्
अम् आर् श् स् + ईत्
अम् आर् ष् स् + ईत्
अम् आर् क् ष् + ईत्
अमार्क्षीत्

सिच्यभावे क्सपक्षे

अमृश् च्लिँ + त्
अमृश् क्स+ त्
अमृष् स+ त्
अमृक् ष+ त्
अमृक्षत्

परस्मैपदिधातुषु ‘शद्’ धातोः प्रक्रिया

❑ शदॢँ शातने= नाशकरणे॥ ३८॥ तङानयोर्-विधायकं विधिसूत्रम्— शदेः शितः अर्थः—शिद्भाविनोऽस्मात्तङानौ स्तः। शीयते। शीयताम्। अशीयत। शीयेत। शशाद। शत्ता। शत्स्यति। अशदत्। अशत्स्यत्॥

लँट्— शीयते शीयेते शीयन्ते। शीयसे शीयेथे शीयध्वे। शीये शीयावहे शीयामहे।

लिँट्— शसाद शेदतुः शेदुः। शेदिथ-शशत्थ, शेदथुः शेद। शशाद-शशद, शेदिव शेदिम।

लुँट्— शत्ता शत्तारौ शत्तारः। शत्तासि शत्तास्थः शत्तास्थ। शत्तास्मि शत्तास्वः शत्तास्मः।

लृँट्— शत्स्यति शत्स्यतः शत्स्यन्ति। शत्स्यसि शत्स्यथः शत्स्यथ। शत्स्यामि शत्स्यावः शत्स्यामः।

लोँट्—शीयताम् शीयेताम् शीयन्ताम्। शीयस्व शीयेथाम् शीयध्वेवम्। शीयै शीयावहै शीयामहै।

लँङ्— अशीयत अशीयेताम् अशीयन्त। अशीयथाः अशीयेथाम् अशीयध्ववम्। अशीये अशीयावहि अशीयामहि।

वि.लिँङ्—शीयेत शीयेयाताम् शीयेरन्। शीयेथाः शीयेयाथाम् शीयेध्ववम्। शीयेय शीयेवहि शीयेमहि।

आ.लिँङ्— शद्यात् शद्यास्ताम् शद्यासुः। शद्याः शद्यास्तम् शद्यास्त। शद्यासम् शद्यास्व शद्यास्म।

लुँङ्— अशदत् अशदताम् अशदन्। अशदः अशदतम् अशदत। अशदम् अशदाव अशदाम।

लृँङ्— अशत्स्यत् अशत्स्यताम् अशत्स्यन्। अशत्स्यः अशत्स्यतम् अशत्स्यत। अशत्स्यम् अशत्स्याव अशत्स्याम।

शद् + त
शीय् अ + ते
शीयते

अशद् च्लिँ + त्
अशद् अङ् + त्
अशदत्

संस्कृतसारः
छिद्यन्ते सर्वसंशयाः

परस्मैपदिधातुषु ‘कृ’ धातोः प्रक्रिया

❑ कृ विक्षेपे॥ ३९॥

❖ इकार-विधायकं विधिसूत्रम्—

सूत्रम्— ॠत इद्धातोः॥ (७,१.१००)

अर्थः—ॠदन्तस्य धातोरङ्गस्य इत्स्यात्। किरति। चकार। चकरतुः। चकरुः। करीता, करिता। कीर्यात्॥ अकारीत्।

कॄ अ + ति
किर् अ + ति
किरति

कॄ कॄ + ति
कॄ कॄ + अ
कर् कर् + अ ऋच्छत्यॄताम्
च कार् + अ अत उपधायाः
चकार

कॄ + इ ता
कर् + इ ता वृतो वा
करीता, करिता

कॄ + यास् त्
किर् + यात्
कीर् + यात् हलि च
कीर्यात्

‘कृ’ धातोः ‘सुँट्’ विधानम्

उप+किरति
उप+स् किरति
उपस्किरति

उप+अकिरत्
उप+अस्किरत्
उपस्किरत्

उप+चकार
उप+च स् कार
उपचस्कार

❖ सुँडागम-विधायकं विधिसूत्रद्वयम्—

सूत्रम्— किरतौ लवने (६,१.१४०)

अर्थः— उपात्किरतेः सुँट् छेदने। उपस्किरति।

❖ ‘अडभ्यासव्यवायेऽपि’ इति वचनं कतिपय-संस्करणेषु सूत्ररूपेण दत्तं तद्भाष्यविरुद्धम्। सुँट्-कात्पूर्वत्वनियमवार्तिकम्—

वार्त्तिकम्— अडभ्यासव्यवायेऽपि (सुँट् कात् पूर्वः) इति वक्तव्यम्।

अर्थः— ‘सुँट् कात्पूर्व’ इति सूत्रे ‘अडभ्यासव्यवायेऽपि वार्त्तिकं कर्त्तव्यम्। अडागमस्य अभ्यासस्य च व्यवधाने ककारात्पूर्वं सुँडागमः स्यात्। उपास्किरत्। उपचस्कार॥

सूत्रम्— हिंसायां प्रतेश्च (६,१.१४१)

अर्थः— उपात्प्रतेश्च किरतेः सुँट् स्यात् हिंसायाम्। उपस्किरति। प्रतिस्किरति॥

संस्कृतसारः छिद्यन्ते सर्वसंशयाः

परस्मैपदिधातुषु 'गॄ' धातोः प्रक्रिया

लघुसिद्धान्तकौमुद्याम् (तिङन्ते तुदादयः)

गॄ अ + ति
गिर् अ + ति
गिरति , गिलति

❑ गॄ निगरणे ॥ ४० ॥ वैकल्पिक-लत्व-विधायकं विधिसूत्रम्— अचि विभाषा

अर्थः—गिरते रेफस्य लो वाजादौ प्रत्यये। गिलति, गिरति । जगाल,जगार। जगलिथ, जगरिथ । गलीता, गलिता, गरीता, गरिता ॥

लँट्— गिलति गिलतः गिलन्ति......। गिरति गिरतः गिरन्ति.....। शेषं सुगमम्।
लिँट्— जगाल जगलतुः जगलुः। जगलिथ....। जगार जगरतुः जगरुः। जगरिथ....शेषं सुगमम्।
लुँट्— गलीता गलीतारौ गलीतारः। गलिता गलितारौ गलितारः। गरीता, गरिता। शेषं सुगमम्।
लृँट्— गलीष्यति गलीष्यतः गलीष्यन्ति। गलिष्यति गलिष्यतः गलिष्यन्ति। गरीष्यति गरिष्यति। शेषं सुगमम्।
लोँट्— गिलतु-तात् गिलताम् गिलन्तु.......। गिरतु-तात् गिरताम् गिरन्तु.....। शेषं सुगमम्।
लँङ्— अगिलत् अगिलताम् अगिलन्.....। अगिरत् अगिरताम् अगिरन्.....। शेषं सुगमम्।
वि.लिँङ्— गिलेत् गिलेताम् गिलेयुः......। गिरेत् गिरेताम् गिरेयुः....। शेषं सुगमम्।
आ.लिँङ्— गीर्यात् गीर्यास्ताम् गीर्यासुः.....। शेषं सुगमम्।
लुँङ्— अगालीत् अगालिष्टाम् अगालिषुः.....। अगारीत् अगारिष्टाम् अगारिषुः...। शेषं सुगमम्।
लृँङ्— अगलीष्यत्, अगलिष्यत्। अगरीष्यत्, अगरिष्यत्। शेषं सुगमम्।

परस्मैपदिधातुषु 'प्रच्छ्' धातोः प्रक्रिया

❑ प्रच्छँ ज्ञीप्सायाम्।४२ ।'ग्रहिज्येति' सम्प्रसारणम्। पृच्छति। पप्रच्छ। पप्रच्छतुः। प्रष्टा। प्रक्ष्यति। अप्राक्षीत्॥

प्रच्छ् अ + ति— पृच्छ् अ + ति= पृच्छति	प्रच्छ् + ता— प्र ष् + टा= प्रष्टा	प्रष्‌ स्य + ति— प्रक् ष्य + ति= प्रक्ष्यति

लँट्— पृच्छति पृच्छतः पृच्छन्ति । पृच्छसि पृच्छथः पृच्छथ । पृच्छामि पृच्छावः पृच्छामः ।
लिँट्— पप्रच्छ पप्रच्छतुः पप्रच्छुः । पप्रच्छिथ-पप्रष्ठ पप्रच्छथुः पप्रच्छ । पप्रच्छ पप्रच्छिव पप्रच्छिम ।
लुँट्— प्रष्टा प्रष्टारौ प्रष्टारः । प्रष्टासि प्रष्टास्थः प्रष्टास्थ । प्रष्टास्मि प्रष्टास्वः प्रष्टास्मः ।
लृँट्— प्रक्ष्यति प्रक्ष्यतः प्रक्ष्यन्ति । प्रक्ष्यसि प्रक्ष्यथः प्रक्ष्यथ । प्रक्ष्यामि प्रक्ष्यावः प्रक्ष्यामः ।
लोँट्— पृच्छतु-तात् । पृच्छताम् । पृच्छन्तु । पृच्छ-तात् । पृच्छतम् । पृच्छत । पृच्छानि। पृच्छाव। पृच्छाम ।
लँङ्— अपृच्छत् अपृच्छताम् अपृच्छन् । अपृच्छः अपृच्छतम् अपृच्छत । अपृच्छम् अपृच्छाव अपृच्छाम ।
वि.लिँङ्—पृच्छेत् पृच्छेताम् पृच्छेयुः । पृच्छेः पृच्छेतम् पृच्छेत । पृच्छेयम् पृच्छेव पृच्छेम ।
आ.लिँङ्—पृच्छ्यात् पृच्छ्यास्ताम् पृच्छ्यासुः । पृच्छ्याः पृच्छ्यास्तम् पृच्छ्यास्त । पृच्छ्यासम् पृच्छ्यास्व पृच्छ्यास्म।
लुँङ्— अप्राक्षीत् अप्राष्टाम् अप्राक्षुः । अप्राक्षीः अप्राष्टम् अप्राष्ट । अप्राक्षम् अप्राक्ष्व अप्राक्ष्म ।
लृँङ्— अप्रक्ष्यत् अप्रक्ष्यताम् अप्रक्ष्यन् । अप्रक्ष्यः अप्रक्ष्यतम् अप्रक्ष्यत । अप्रक्ष्यम् अप्रक्ष्याव अप्रक्ष्याम ।

संस्कृतसारः
छिद्यन्ते सर्वसंशयाः

आत्मनेपदिधातुषु ‘मृ’ धातोः प्रक्रिया

लघुसिद्धान्तकौमुद्याम्
(तिङन्ते तुदादयः)

❑ मृङ् प्राणत्यागे॥ ४२॥ तङ्-विधायकं नियमसूत्रम्— सूत्रम्— म्रियतेर्लुँङ्लिँङोश्च ॥

अर्थः— लुँङ्लिँङोः शितश्च प्रकृतिभूतान्मृङस्तङ् नान्यत्र। रिङ्। इयङ्। म्रियते। ममार। मर्ता। मरिष्यति। मृषीष्ट। अमृत ॥

मृ अ + त
म् रि अ + त
म् रिय् अ + ते

लँट्— म्रियते म्रियेते म्रियन्ते। म्रियसे म्रियेथे म्रियध्वे। म्रिये म्रियावहे म्रियामहे।

लिँट्— ममार मम्रतुः मम्रुः । ममर्थ मम्रथुः मम्र । ममार-ममर मम्रिव मम्रिम ।

लुँट्— मर्ता मर्तारौ मर्तारः । मर्तासि मर्तास्थः मर्तास्थ । मर्तास्मि मर्तास्वः मर्तास्मः ।

लृँट्— मरिष्यति मरिष्यतः मरिष्यन्ति । मरिष्यसि मरिष्यथः मरिष्यथ । मरिष्यामि मरिष्यावः मरिष्यामः ।

लोँट्— म्रियताम् म्रियेताम् म्रियन्ताम् । म्रियस्व म्रियेथाम् म्रियध्वम् । म्रियै म्रियावहै म्रियामहै ।

लँङ्— अम्रियत अम्रियेताम् अम्रियन्त । अम्रियथाः अम्रियेथाम् अम्रियध्वम् । अम्रिये अम्रियावहि अम्रियामहि ।

वि.लिँङ्—म्रियेत म्रियेयाताम् म्रियेरन् । म्रियेथाः म्रियेयाथाम् म्रियेध्वम् । म्रियेय म्रियेवहि म्रियेमहि ।

आ.लिँङ्— मृषीष्ट मृषीयास्ताम् मृषीरन् । मृषीष्ठाः मृषीयास्थाम् मृषीध्वम् । मृषीय मृषीवहि मृषीमहि।

लुँङ्— अमृत अमृषाताम् अमृषत । अमृथाः अमृषाथाम् अमृढ्वम् । अमृषि अमृष्वहि अमृष्महि ।

लृँङ्— अमरिष्यत् अमरिष्यताम् अमरिष्यन् । अमरिष्यः अमरिष्यतम् अमरिष्यत । अमरिष्यम् अमरिष्याव अमरिष्याम ।

तुदादिगणस्य परीक्षणम्

1. 'तुद्' धातोः लुँङ् लकारे परस्मैपदे केन सूत्रेण हलन्तलक्षणावृद्धिर्भवति ?

क. ऊर्णोतेर्विभाषा

ख. वदव्रजहलन्तस्याचः ✓

ग. अत उपधायाः

घ. लुँङि च

2. शुद्धं रूपं चिनुत -

क. भ्रज्जति

ख. बभृज

ग. भृज्जेत ✓

घ. भ्रज्जेरन्

3. 'भ्रस्जो रोपधयो रमन्यतरस्याम्' इति सूत्रस्य विषये समुचितं कथनमस्ति ?

क. आर्धधातुकेपरे

ख. सार्वधातुकेपरे

ग. रेफस्योपधायाश्च स्थाने

घ. क, ग उभयोः ✓

4. 'बभ्रस्ज् + थ' इत्यत्र कस्य लोपोभवति ?

क. जकारोत्तरवर्ती थकारस्य

ख. सकारोत्तरवर्ती जकारस्य

ग. सकारपूर्ववर्ती रेफस्य

घ. जकारपूर्ववर्ती सकारस्य ✓

5. 'भृज्ज्यात्' इत्यत्र सम्प्रसारणं कथं भवति ?

क. क्ङिति रमागमं बाधित्वा सम्प्रसारणं पूर्वविप्रतिषेधेन ✓

ख. क्ङिति रमागमं सम्प्रसारणं पूर्वविप्रतिषेधेन

ग. क्ङिति रमागमं बाधित्वा सम्प्रसारणं अपूर्वविप्रतिषेधेन

घ. क्ङिति रमागमं बाधित्वा पूर्व सम्प्रसारणम्

6. कस्मिन् धातोः 'नुनुदाते' इति रूपं भवति ?

क. णद अव्यक्ते शब्दे

ख. णू स्तवने

ग. णश अदर्शने

घ. णुद प्रेरणे ✓

7. 'कृषेते' इत्यत्र लघूपधगुणस्य निषेधः कथं भवति ?

क. पित्वात्

ख. क्तिवात्

ग. ङित्वात् ✓

घ. शत्वात्

8. मुचादिधातुर्नास्ति —

क. लिप्

ख. लुभ् ✓

ग. खिद्

घ. कृत्

9. तुदादिप्रकरणे 'विद्' धातुरस्ति —

क. सत्तायाम्

ख. ज्ञाने

ग. लाभे ✓

घ. विचारणे

10. अशुद्धं रूपं चिनुत ?

क. अप्राक्षीः अप्राष्टम् अप्राष्ट

ख. ममर्थ मम्रथुः मम्र

ग. तोत्तासि तोत्तास्थः तोत्तास्थ

घ. अमेलीः अमेलिष्टम् अमेलिष्टः ✓

11. एषु को धातुः परस्मैपदी ?

क. जुषी

ख. पृङ्

ग. मृङ्

घ. इषुँ ✓

12. 'ॠत इद्धातोः' इति सूत्रस्य अर्थोऽस्ति ?

क. ऋदन्तस्य धातोरङ्गस्य इत्स्यात्

ख. ॠदन्तस्य धातोरङ्गस्य ईत्स्यात्

ग. ॠदन्तस्य धातोरङ्गस्य इत्स्यात् ✓

घ. ऋदन्तस्य धातोरङ्गस्य ईत्स्यात्

13. 'लिपँ' धातोः कोऽर्थः ?

क. संगमे

ख. उपदेहे ✓

ग. अवयवे

घ. उत्सर्गे

14. 'आत्मनेपदेष्वन्यतरस्याम्' इति सूत्रेण कस्य स्थाने अङ् भवति?

क. च्लेः ✓

ख. सिचि

ग. त

घ. सर्वत्र

15. व्याघ्रभूतिमते 'विद्लृँ लाभे' इति धातुरस्ति ?

क. वेट्

ख. अनिट्

ग. सेट् ✓

घ. कोऽपि न

16. 'द्विहल्ग्रहणस्यानेकहलुपलक्षणत्वान्नुँट्' इति कस्य सूत्रस्य सन्दर्भे कथितम् ?

क. ऋच्छत्यॄताम्

ख. तस्मान्नुडचि

ग. इजादेश्च गुरुमतोऽनृच्छः

घ. तस्मान्नुड् द्विहलः ✓

17. 'व्रश्च् + ता' इत्यत्र कस्य वर्णस्य लोपो भवति ?

क. र्

ख. श् ✓

ग. च्

घ. त्

18. 'तृम्फति' इत्यत्र नुँम् केन भवति ?

क. शे मुचादीनाम्

ख. शे तृम्फादीनां नुँम् वाच्यः ✓

ग. मस्जेरन्त्यात्पूर्वो नुँम् वाच्यः

घ. इदितो नुँम् धातोः

19. 'अरौक्ताम्' इति रूपं वर्तते ?

क. रुज्धातोर्लँटि प्रथमपुरुषद्विवचने

ख. रुज्धातोर्लुँङि प्रथमपुरुषद्विवचने ✓

ग. रुज्धातोर्लँङि प्रथमपुरुषद्विवचने

घ. रुज्धातोर्लिँङि प्रथमपुरुषद्विवचने

20. 'स्फुरँ सञ्चलने' इत्यस्य शुद्धं विकल्पं चिनुत ?

क. निःष्फुरति

ख. निःस्फुरति

ग. निष्षफुरति

घ. सर्वाणि ✓

21. 'श' विकरणं भवति ?

क. तुदादौ ✓

ख. अदादौ

ग. स्वादौ

घ. सर्वत्र

22. 'विज इट्' इति सूत्रमस्ति ?

क. संज्ञासूत्रम्

ख. परिभाषासूत्रम्

ग. अतिदेशसूत्रम् ✓

घ. नियमसूत्रम्

23. 'तुद्' धातुविषये इदं कथनमसङ्गतं प्रतिभाति ?

क. 'तुदति' इत्यत्र 'क्ङिति च' इति सूत्रेण गुणनिषेधः

ख. 'तुत्सीष्ट' इत्यत्र 'लिँङ्सिँचावात्मनेपदेषु' इति सूत्रेण क्तिवात् गुणं भवति ✓

ग. 'तोत्ता' इत्यत्र 'खरि च' इति सूत्रेण दकारस्य तकारादेशः

घ. 'तुदतु' इत्यत्र 'एरुः' इति सूत्रेण इकारस्य उकारः

24. 'कॄ विक्षेपे' इत्यस्मात् धातोः उपात्प्रतेश्च किरतेः सुट् कस्मिन्नर्थे भवति ?

क. लवने

ख. हिंसायाम्

ग. उभयोः ✓

घ. कस्मिन्नर्थेऽपि न

25. गरीता इत्यत्र 'वृतो वा' सूत्रेण भवति ?

क. गुणः

ख. दीर्घः ✓

ग. वृद्धिः

घ. इडागमः